Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

Puspa Shrestha
Best Quality Resource Site for Class 11 And 12 Students (Based on Updated Curriculum 2077)
puspas.com.np
PDF Collections
Notes
Books
Model Questions

This PDF was downloaded from puspas.com.np

Visit our website for more materials.

puspas.com.np

Follow us on:
AR Dinesh
puspas.com.np
Puspa Shrestha

# ३५. संस्कृतभाषाव्याकरणम्

## विशिष्टीकरणतालिका

**कक्षा : १२** — **पूर्णाङ्काः ७५**
**समयः घण्टात्रयम्**

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् (१×१=१) | | | बोधः (१×१=१) | | | शिल्पम् (१×५=५) | | | उच्च- दक्षता (१×८=८) | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | गद्यम् | ज्ञान-बोध-प्रयोग-उच्च-दक्षतात्मकम् | २ | - | - | २ | - | - | - | १० | - | - | - | १६ | ८ | ३० | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टजीवनीतः जन्ममृत्युप्रक्रिया-कृतिनाम-जन्मस्थान-उपाधि-नामपर्यायज्ञानसम्बद्ध एकः, निर्दिष्टकथातः कथाकारपरिचय-प्रमुखचरित्राभिज्ञान-कथास्रोतोभिज्ञान-विशिष्टोक्तिकथयितृपरिचयसम्बद्धो घटनाया बीजकारणनिदर्शनसम्बद्धो वा एकः, निर्दिष्टजीवनीतः नामव्युत्पत्ति-योगदान-प्रसिद्धिकारण-प्रेरकपक्षोद्घाटनसम्बद्ध एकः, निर्दिष्टकथातः कथाप्रकार-प्रसङ्गनिर्देश-विशिष्टकथनान्वेषण-मूलसन्देशान्वेषण-प्रेरकपक्षोद्घाटनसम्बद्ध एक प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टकथातः कथासारलेखन-चरित्रानुशीलन-संवादवैशिष्ट्यप्रकाशन-सूक्त्यर्थप्रकाशन-कथासङ्क्षेपीकरणशिल्पप्रदर्शनसम्बद्ध एकः प्रश्नः, निर्दिष्टविषये प्रबन्धलेखनाय मूलसूत्रलेखनसम्बद्धो निर्दिष्टजीवनीतः प्रेरणा-योगदान-सूत्राधृतजीवनीलेखन-कार्यविवेचनशिल्पप्रदर्शनसम्बद्धो एकः प्रश्नः वा मूलसूत्राण्यनुसृत्य घटनावर्णनात्मक एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>द्वौ विषयौ प्रदाय एकस्मिन् विषये प्रबन्धलेखनसम्बद्ध एकः, सूत्राण्याधृत्य कथालेखनसम्बद्ध एकः प्रश्नः । |
| २. | चम्पूः | ज्ञान-बोध-प्रयोगात्मकम् | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानबोध**क्षेत्रतः-<br>निर्दिष्टेषु गद्यतः पद्यतो वा रिक्तस्थानपूरणसम्बद्ध एकः, पठितसमस्तपदस्य वाक्ये प्रयोगप्रदर्शनसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>निर्दिष्टपद्यस्य सरलार्थ-भावार्थलेखन-प्रेरकपक्षसूत्रीकरणसम्बद्ध एकः प्रश्नः ।<br>**अथवा**<br>निर्दिष्टगद्यतो विषयवर्णनात्मक एकः प्रश्नः । |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ३. | व्याकरणम् | ज्ञान-बोध-प्रयोग-उच्च-दक्षतात्मकम् | २ | - | - | ३ | - | - | - | २५ | - | - | - | ८ | ११ | ३८ | **ज्ञानबोध**क्षेत्रतः-<br>कृदन्ततो विग्रह-प्रत्ययविधायकसूत्र-सूत्रकार्य-प्रत्ययादेश-प्रत्ययादेशविधायकसूत्रज्ञानसम्बद्ध एकः प्रश्नः, तद्धिततो विग्रह-प्रत्ययविधायकसूत्र-सूत्रकार्य-प्रत्ययादेश-प्रत्ययादेशविधायकसूत्रज्ञानसम्बद्ध एकः प्रश्नः, कृदन्ततः प्रकृतिप्रत्ययविभाग-प्रकृतिप्रत्ययसंयोजन-विग्रहानुकूलनिष्पन्नरूपलेखनसम्बद्ध एकः प्रश्नः, समासतः समस्तपदेषु समुचितलौकिकालौकिकविग्रहलेखनसम्बद्धो विग्रहानुसारेण समस्तपदलेखनसम्बद्धो विग्रहानुकूलप्रवर्तमानसूत्रलेखनसम्बद्धः समस्तपदेषु समासनामलेखनसम्बद्धो वा एकः प्रश्नः, तद्धिततः प्रकृतिप्रत्ययविभाग-प्रकृतिप्रत्ययसंयोजन-विग्रहानुकूलनिष्पन्नरूपलेखनसम्बद्ध एकः प्रश्नः ।<br>**शिल्प**क्षेत्रतः-<br>कृदन्ततो विशेष्यनिघ्नलिङ्गपदस्य त्रिषु लिङ्गेषु वाक्ये प्रयोगप्रदर्शनसम्बद्ध एकः प्रश्नः, कृदन्ततो विशेषसूत्रप्रदर्शनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः प्रश्नः, कृदन्तशब्दस्य रूपावलिलेखनसम्बद्ध एकः प्रश्नः, समासतो विशेषसूत्रप्रदर्शनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः प्रश्नः, तद्धिततो विशेषसूत्रप्रदर्शनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>कृदन्ततः सूत्रार्थसङ्घटनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः, समासतः सूत्रार्थसङ्घटनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः वा तद्धिततः सूत्रार्थसङ्घटनपूर्वकं रूपसिद्धिप्रक्रियालेखनसम्बद्ध एकः प्रश्नः । |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते व्याकरणस्थाने न्यायविषयस्य निम्नाङ्किता विशिष्टीकरणतालिका अवलम्बनीया

| क्र. स. | विषयक्षेत्रम् (पठनं लेखनञ्च) | प्रश्नप्रकृतिः | ज्ञानम् (१×१=१) | | | बोधः (१×१=१) | | | शिल्पम् (१×५=५) | | | उच्च- दक्षता (१×८=८) | | | प्रष्टव्याः प्रश्न सङ्ख्याः | अङ्क भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | पदार्थ-निर्वचनम् | ज्ञान- | १ | - | - | १ | - | - | - | - | - | - | - | - | २ | २ | **ज्ञानबोध**क्षेत्रतः- |

CURRICULUM DEVELOPMENT CENTRE

| | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | बोधात्मकम् | | | | | | | | | | | | | | | निर्दिष्टपारिभाषिकशब्दानामर्थ-परिभाषा-उदाहरणलेखनसम्बद्ध एकः,<br>निर्दिष्टेषु परिभाषा-अर्थ-उदाहरणानि अनुसृत्य पारिभाषिकशब्दबोधसम्बद्ध एकः प्रश्नः । | |
| २. | जल-तेजो-वायु-आकाश-कालदिग्-द्रव्यपरिचयः | प्रयोगात्मकम् | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः-<br>जलसम्बद्ध एकः प्रश्नः, तेजो-वायु-आकाशसम्बद्ध एकः प्रश्नः । | |
| ३. | आत्मनिरूपणम् | ज्ञान-बोधोच्च-दक्षतात्मकम् | १ | - | - | १ | - | - | - | - | - | - | - | ८ | ३ | १० | **ज्ञान**क्षेत्रतः-<br>आत्मपरात्मलक्षणवाक्यलेखनसम्बद्धः, पदपरिचय-अर्थज्ञानसम्बद्धः, आत्म-शरीर-इन्द्रिय-प्रकृति-पुरुष-चैतन्यविषये नैयायिक-बौद्ध-वेदान्ति-साङ्ख्यानां मतवाक्यलेखनसम्बद्धो वा एकः प्रश्नः,<br>निर्दिष्टेषु लक्षणवाक्यमुदाहरणं वानुसृत्य विषयान्वेषणसम्बद्धः पदव्युत्पत्ति-पदपरिचायनसम्बद्ध एकः प्रश्नः ।<br>**उच्चदक्षता**क्षेत्रतः-<br>आत्मवादसम्बद्धानामन्यमतानां खण्डनसम्बद्धः, आत्मलक्षण-आत्मत्वजातिसिद्धि-परात्मसिद्धि-आत्मविभुत्वसम्बद्ध एकः प्रश्नः । | |
| ४. | ज्ञानभेद-प्रदर्शनपूर्वकं प्रत्यक्षम् । | बोधप्रयोगात्मकम् | - | - | - | १ | - | - | - | ५ | - | - | - | - | २ | ६ | **बोध**क्षेत्रतः-<br>निर्दिष्टेषु लक्षणवाक्यमुदाहरणं वानुसृत्य विषयान्वेषणसम्बद्धः पदव्युत्पत्ति-पदपरिचायनसम्बद्धो वा एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः-**<br>बुद्धि-प्रत्यक्ष-अनुभूतिभेदसम्बद्धः, त्वगीन्द्रियजन्यद्रव्यप्रत्यक्षे रूपस्य कारणाकारणत्वसम्बद्धः, ज्ञानसामान्ये त्वङ्मनःसंयोगस्य कारणसम्बद्धः, द्रव्यप्रत्यक्षे महत्त्वस्य कारणसम्बद्धः इन्द्रियलक्षणसम्बद्धो वा एकः प्रश्नः । | |
| ५. | सन्निकर्षः | प्रयोगात्मकम् | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः-<br>लौकिकसन्निकर्षभेदविवेचनसम्बद्ध एकः प्रश्नः,<br>लौकिकसन्निकर्षभेदविवेचनसम्बद्ध एकः प्रश्नः । | |
| योगः | | | २ | | | ३ | | | | २५ | | | | ८ | ११ | ३८ | | |

**द्रष्टव्यः** 'क' इत्यनेन अतिलघुप्रश्नो बोध्यः ।
'ख' इत्यनेन लघुप्रश्नो बोध्यः ।
'ग' इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः।

CURRICULUM DEVELOPMENT CENTRE

निदर्शनप्रश्नपत्रम्

## संस्कृतभाषाव्याकरणम्

**कक्षा** १२ **पूर्णाङ्का:** ७५

**समय:** सपादघण्टाद्वयम्

### समूहः 'क'

**अधस्तनप्रश्नानामविस्तरेणोत्तराणि लिखत** **११×१=११**

### भाषाखण्डः (सर्वेषां कृते)

१. देवदत्तस्यापरं नाम किम् ?

२. 'चरित्रनिर्माणम्' इति कथायाः स्रोतः कः ?

३. देवदत्तस्य जीवनवृत्ताज्जनाः कां प्रेरणां लभन्ते ?

४. 'चरित्रनिर्माणम्' इति कथायाः सन्देशवाक्यं लिखत ।

५. पाठाधारेण रिक्तस्थानं पूरयत

वृत्तं यत्नेन ............... वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो ............ हतो हतः ॥

६. 'स्वास्थ्यविज्ञानम्' इति पदस्य वाक्ये प्रयोगं दर्शयत ।

### व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)

७. 'करोति' इत्यर्थे कृ-धातोस्तृच्-प्रत्ययविधायकं सूत्रं किम् ?

८. 'कृ+ण्यत्' इत्यत्र किं रूपं निष्पद्यते ?

९. 'कण्ठेकालः' इत्यस्य लौकिकमलौकिकञ्च विग्रहं लिखत ।

१०. 'कुलीनः' इत्यस्य प्रकृतिप्रत्ययौ विभजत ।

११. प्रत्यययाद्योः खछयोः स्थाने कौ आदेशौ विधीयेते ?

### न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)

७. किन्नाम सादृश्यम् ?



CURRICULUM DEVELOPMENT CENTRE

८. चन्द्रकान्तमणिः कस्य प्रतिबन्धकः ?

९. आत्मलक्षणं किम् ?

१०. कस्य मते चैतन्यं नित्यविज्ञानम् ?

११. परामर्श इति पदस्य कोऽर्थः ?

**समूहः 'ख'**

**अधस्तनप्रश्नानां नातिविस्तरेणोत्तराणि लिखत** **८×५=४०**

**भाषाखण्डः (सर्वेषां कृते)**

१२. पाठस्थकथामाधृत्य यज्ञदत्तस्य चारित्रिकं वैशिष्ट्यं दशसु वाक्येषु प्रकाशयत ।

१३. पाठप्रदत्तजीवनवृत्ताधारेण स्वास्थ्यविज्ञानक्षेत्रे देवदत्तस्य योगदानं सूत्ररूपेण लिखत ।

अथवा

अधस्तनसूत्राण्याधृत्य घटनावर्णनं कुरुत

श्रावणमासः ................ अतिवृष्टिः ..................... जलौघः .................. ग्रामस्य समीपे भूक्षयः ...................... सस्यादीनां हानिः .................. षण्णां पशूनां व्यापादनम् ........... द्वित्राणां जनानामाहननम् ................. ग्रामीणैः सह सर्वकारस्य उद्धारकार्यम् ।

१४. अधस्तनपद्यस्य सरलार्थं विलिख्य प्रेरकपक्षं सूत्रीकुरुत

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।

अद्यैव वा मरणमस्तु युगान्तरे वा न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥

अथवा

पाठस्थचम्पूकाव्यमनुसृत्य दानस्य महत्त्वं वर्णयत ।

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

१५. 'अकार्षीत्' इत्यर्थे कृ-धातोः क्तवतु-प्रत्यये प्रतिलिङ्गं जायमानमेकैकं पदं विलिख्य तेषां वाक्ये प्रयोगं दर्शयत ।

१६. जनार्दनः, पुत्रकाम्या, छिन्नः, एधनीयम्, एषु द्वयोः ससूत्रं सिद्धिं कुरुत ।

अथवा

स्तुतिः, नेत्रम्, प्रियंवदः, शयित्वा, एषु द्वौ प्रयोगौ ससूत्रं साधयत ।



CURRICULUM DEVELOPMENT CENTRE

१७. पच्-धातोः शतृ-प्रत्यये निष्पन्नस्य प्रातिपदिकस्य पुँल्लिङ्गे जायमानानि रूपाणि लिखत ।

१८. अधिहरि, राजपुरुषः, नीलोत्पलम्, एषु द्वयोः ससूत्रं सिद्धिपथं दर्शयत ।

अथवा

व्यूढोरस्कः, हरिहरौ, पितरौ, एषु द्वयोः प्रयोगयोःससूत्रं साधनं विधत्त ।

१९. दाक्षिः, देवता, चतुर्धा, एषु द्वयोः प्रयोगयोः ससूत्रं सिद्धिप्रकारं दर्शयत ।

**न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

१५. जले माधुर्यं साधयेत् ।

१६. तेजस्त्वजातिः कथं सिद्धयति ?

अथवा

शब्दस्य विशेषगुणवत्वं प्रतिपादयत ।

१७. त्वङ्मनःसंयोगोज्ञानसामान्ये कथं कारणम् ? किञ्च तत्र प्रमाणम् ?

१८. लौकिकसन्निकर्षाः कति ? के च ते ?

१९. ज्ञानलक्षणसन्निकर्षस्य प्रयोजनं किम् ?

अथवा

योगजसन्निकर्षं निरूपयत ।

**समूहः 'ग'**

**अधस्तनप्रश्नानामुत्तराणि लिखत** **३×८=२४**

**भाषाखण्डः (सर्वेषां कृते)**

२०. अधस्तनयोरेकस्मिन् विषये प्रबन्धं लिखत

(क) राष्ट्रगौरवम् (ख) सङ्घे शक्तिः

अथवा

२१. प्रदत्तानि सूत्राण्याधृत्य कथां रचयत

नद्याः समीपे साधोर्निवासः ।

सज्जनः दयालुः परोपकारी च ।



CURRICULUM DEVELOPMENT CENTRE

एकदा साधोः स्नानार्थम् नद्यां गमनम् ।

स्नानक्रमे महति जलप्रवाहे वृश्चिकस्य आगमनम् ।

वृश्चिकमुह्यमानं दृष्ट्वा साधोः 'एषः वृश्चिकः रक्षणीयः' इति चिन्तनम् ।

साधोर्वृश्चिकस्य हस्ते ग्रहणम् ।

वृश्चिकस्य दशनम् ।

साधोः वृश्चिकस्य पुनर्ग्रहणम् ।

वृश्चिकस्य पुनर्दशनम् ।

वृश्चिकं नदीतटमानेतुं साधोरविचलितप्रयत्नः ।

अन्ते वृश्चिकस्य रक्षणम् ।

वृश्चिकस्य स्वभावो दशनं साधोश्च रक्षणम् ।

स्वस्वभावः नैव परित्याज्य इति सन्देशः ।

**व्याकरणखण्डः (कवर्गे नव्यव्याकरणेतरविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

२२. उपशरदम्, स्तोकान्मुक्तः, चित्रगुः, एषु द्वयोः ससूत्रं सिद्धिप्रक्रियां दर्शयत ।

अथवा

दैत्यः, गोमान्, पाशुपतम्, ग्रामीणः, सामाजिकः, वैनतेयः, एषु चतुर्णां सूत्रं साधनं कुरुत ।

**न्यायखण्डः (कवर्गे नव्यव्याकरणविषयमवलम्ब्य अधीयानां छात्राणां कृते)**

२२. 'मन एव चेतनमस्तु' इति शङ्कायाः किं समाधानम् ?

अथवा

परमतखण्डनपुरःसरमात्मत्वजातिं प्रतिपादयत ।

-०-

CURRICULUM DEVELOPMENT CENTRE

# Puspa Shrestha

Best Quality Resource Site for Class 11 And 12 Students
(Based on Updated Curriculum 2077)

Please subscribe to our YouTube Channel. Also, like and follow us on our Facebook Page.

Please check out the following post for downloading model questions of other subjects.

## Class 12 Model Question 2078 PDF (All Subjects) With Specification Grid

Dinesh Shrestha




Please email us at pdf-feedback@puspas.com.np if you have any suggestions or feedback.

**Follow us on:**

AR Dinesh puspas.com.np Puspa Shrestha